दिनाङ्कः-28.12.2025 सायं - 06:20

<u>आदौ मुख्यवार्ताः</u>

· प्रधानमन्त्री नरेन्द्रमोदी पञ्च-विंशत्युत्तर-द्वि-सहस्र-तमवर्षम् राष्ट्रिय-सुरक्षा , क्रीडा, विज्ञानं च प्रभृति जगतः वृहत्तम-मञ्चेषु भारताय महत्त्वपूर्णम् प्रतिपादितवान्।

· आकाशवाण्याः मन की बात कार्यक्रमे प्रधानमन्त्रिणा सिन्दूराभियानं सविशेषम् उल्लेखितम्।

· राष्ट्रपतिः द्रापदी मुर्मुः अद्य कर्णाटकस्य करवार- नौसेन्य-स्थासने वाघशीर-सबमरीन इति जलान्तर्गामिन्याः यात्रां विदधाति।

· महिलानां क्रिकेट्-क्रीडायां भारत-श्रीलङ्कादलयोः विंशतिं प्रतिविंशतिः स्पर्धामालिकायाः चतुर्थी स्पर्धा अद्य सायं सप्तवादने भविष्यति।

<u>प्रधानमन्त्री मन की बात</u>

प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् भारतेन अस्मिन् वर्षे सवर्त्र दृढ-प्रभावः स्थापितः। अद्य आकशवाण्याः मन की बात कार्यक्रमे प्रधानमन्त्री अवोचत् यत् राष्ट्रिय-सुरक्षा क्रीडा विज्ञानं च प्रभृति जगतः वृहत्तममञ्चेषु भारत-जनता पञ्च-विंशत्युत्तर-द्वि-सहस्र-तमवर्षे गौरवान्विता अभवत्। तेनोक्तं यत् सिन्दूराभियानं प्रत्येकं नागरिकाय गौरवस्य प्रतीकम् अवर्तत।

श्री-मोदिना वन्दे मातरम् इति गीतस्य सार्धैक-शतवर्ष-पूर्तौ जनानाम् उत्साहोऽपि प्रशंसितः।

प्रधानमन्त्री अवोचत् यत् पञ्च-विंशत्यु-त्तर-द्वि-सहस्र-तमवर्षं क्रीडायै अपि स्मरणीयम् वर्तते। अस्मिन् वर्षे भारतीय पुरुषदलेन आई-सी.सी चैम्पियन्स् ट्राफी इति क्रिकेट स्पर्धा विजिता। महिलादलेन च विश्व-चषक-क्रिकेट स्पर्धा विजिता।

प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् विज्ञानान्तरिक्ष-क्षेत्रे अपि अस्मिन् वर्षे भारतेन महत्वपूर्णपलब्धिः प्राप्ता। ग्रुप कैप्टन सुधांशु शुक्ला प्रथमो भारतीय: संवृत्त: यो हि अन्ताराष्ट्रियान्तरिक्ष केन्द्रम् गतवान्। प्रधानमन्त्री अवोचत् यत् वर्षारम्भे प्रयागराजे महाकुम्भस्य आयोजनं जगति प्रसिद्धिम् अवाप्तवान्। निजसम्बोधने प्रधानमन्त्रिणा स्वदेशी अभियानस्य स्मार्ट इण्डिया हैकाथॉन इत्यस्य पी एम सूर्य घर इति योजनायाः च उल्लेखो विहितः। प्रधानमन्त्रिणा आगामि मासे आयोक्ष्यमाणस्य राष्ट्रिय-युव-दिवसस्य गणतन्त्रदिवसस्य चापि चर्चा कृता।

## राष्ट्रपति: कर्नाटके

राष्ट्रपति: द्रापदी मुर्मु: अद्य कर्णाटकस्य करवार- नौसैन्य-स्थासने वाघशीर-सबमरीन इति जलान्तर्गामिन्याः यात्रां विदधाति। इयं हि कलवेरी श्रेण्या: जलान्तर्गामिनी वर्तते। यात्रावधौ नौसेना प्रमुख: एडमिरल दिनेश के. त्रिपाठी अपि राष्ट्रपतिना सह वर्तते। अयं द्वितीय: अवसर: वर्तते यदा राष्ट्रपतिना कलवेरी श्रेण्या: जलान्तर्गामिन्याः यात्रा क्रियते। इत: पूर्वं षडोत्तर-द्वि-सहस्रतमे वर्षे पूर्वराष्ट्रपति: डा. ए.पी.जे. अब्दुल कलामवर्य अस्या: यात्रां कृतवान्। कारवारे आगमनात् प्राक् कर्नाटकस्य राज्यपाल: थावरचन्द-गहलोत: राष्ट्रपत्यु: स्वागतम् अकरोत्। अवधेयं यत् राष्ट्रपति: गतदिनात् आरभ्य गोवा कर्णाटक झारखण्ड राज्यानां चतुर्दिवसीय-यात्रायां वर्तते इयं यात्रा गतदिने झारखण्डत: अरब्धा।

## प्रधानमन्त्री मुख्यसचिव-सम्मेलनम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य राजधान्यां नवदिल्यां पञ्चम-मुख्य सचिव सम्मेलनस्य अध्यक्षताम् अकरोत्। इदं त्रिदिवसीयं सम्मेलनम् गुरूवासरे आरबधम्। अस्योद्देश्यं राष्ट्रिय-विकास-प्राथमिकतासु निरन्तर-संवाद-मध्यमेन केन्द्र-राज्ययो: सहभागितायाः दृढीकरणं वर्तते। इदं सम्मेलनं प्रधामत्रिण: नरेन्द्र मोदिन: सहयोगपूर्ण- सङ्घवादस्य दृष्टे: अनुरूपं तादृश: मञ्च: वर्तते यत्र केन्द्रं राज्यानि च समावेशि-भविष्यनुरूपम् आर्थिक-वृद्धयै मानवानां क्षमताया: सर्वोत्तमोपयोगस्य रूपरेखां निर्धारयन्ति। अस्य सम्मेलनस्य विषय: विकसितभारताय मानव सम्पत्ति: वर्तते। सम्मेलने राज्यानां केन्द्रशसित- प्रदेशनां च सर्वोत्तमा: कार्यपद्धतय: परस्परं सहक्रियन्ते। सम्मेलनस्य अन्तर्गतं बालशिक्षा-विद्यालय-

शिक्षा कोशल विकास:- उच्चशिक्षा क्रीडा पाठ्येतर गतिविधय: च पञ्च-महत्त्वपूर्णानि क्षेत्राणि सन्ति।

**मुख्यनिर्वाचनायुक्तः**

मुख्यनिर्वाचनायुक्तः ज्ञानेश-कुमारः निर्वाचन-प्रक्रियायाः विविध-विषयेषु चर्चायै श्वः भुवनेश्वरनगरे मतदान-केन्द्र-स्तराधिकारिभिः सह मेलिष्यति। ओडिशाराज्यस्य खोरधा-कटकजनपदयोः प्रायः अष्टशताधिकारिणः अस्मिन् सम्मेलने भागं भजिष्यन्ति । तत्र तावत् निर्वाचन-सूच्याः सत्यापने तेषां महत्त्वपूर्ण-भूमिकायां ध्यानं केन्द्रितं भविष्यति। मुख्यनिर्वाचनायुक्तः वरिष्ठ-राज्य-निर्वाचनाधिकारिभिः सहापि उपवेशनानि करिष्यति, येन कार्य-सज्जतायाः समीक्षा भवेत्। मतदातृ-सेवा-प्रबन्धनस्य समाह्वानानां च समाधानं सम्पद्येत । एषा यात्रा ओडिशाराज्ये निर्वाचन-सूच्याः विशेष-गहन-पुनरीक्षणस्य तृतीय-चरणस्य आरम्भात् पूर्वं पूर्वाभास-रूपेण अवलोक्यते । अस्यां प्रक्रियायां प्रतिगृहं सत्यापनं भविष्यति, यस्य उद्देश्यं दोषयुक्त-प्रविष्टयः निरस्य दोषरहितायाः मतदातृ-सूच्याः सुनिश्चयः वर्तते। मुख्य-निर्वाचनायुक्तः, गतदिनादारभ्य ओडिशाराज्यस्य त्रिदिवसीय-यात्रायामस्ति, तेन पुरी-जनपदस्य रघुराजपुरग्रामस्य अवलोकनं कृतम्। अयं ग्रामः पट्टचित्र-कलायाः कृते सुप्रसिद्धः अस्ति।

-

**गृहमन्त्री गुजरात**

केन्द्रीयगृहमन्त्रिणा अमितशाहेन उक्तं यत् (आइ. एम्. ए.) इति भारतीयचिकित्सासङ्घस्य योगदानं चिकित्साक्षेत्रे सर्वाधिकं वर्तते । अद्य अहमदाबाद-नगरे भारतीय-चिकित्सासङ्घेन आयोजितं विंशत्यधिकद्विसहस्रतमवर्षस्य आइ. एम्. ए. नेटकोन् इति कार्यक्रमम् सम्बोधयन् श्री शाह: अवोचत् यत् आयुष्मान-भारत-योजना देशे महद् परिवर्तनम् आनयत् । गृहमन्त्री अवदत् यत् कोरोनावधौ सेवां कुर्वन्तः चिकित्सकाः रोगिभ्यः प्राथमिकताम् अयच्छन् ।

श्री शाहः अद्य अहमदाबाद् नगरनिगमद्वारा निर्मितस्य जलनिर्गमन-मार्गस्य प्रथम-चरणस्य सममेव एस्. जी. राजमार्गस्य प्रायोगिक-परियोजनायाः उद्घाटनं विधास्यति।

-

**जितेन्द्रसिंह: शान्ति-विधेयकम्**

केन्द्रीय-विज्ञान-प्रौद्योगिकी-मन्त्री डा. जितेन्द्रसिंहः अवोचत् यत् शान्ति-विधेयकं नरेन्द्रमोदिनः प्रशासनस्य बृहत्तमेषु विज्ञानपरिष्कारेषु अन्यतमम् अस्ति । अद्य नवदिल्ल्यां वार्ताहरैः सह वार्तालापं कुर्वन्, श्री सिंहः अवदत् यत्, भारतस्य परमाणु-ऊर्जा-क्षमता चतुर्दशाधिक-द्वि-सहस्रतमे वर्षे प्रायः चतुः-दशांशः चतुः गीगावाट् परिमितासीत्। अद्य अष्ट दशांशः सप्त गीगावाट्- परिमित-पर्यन्ता द्विगुणिता अभवत्। केन्द्रीयमन्त्री अवदत् यत्, शान्ति-विधेयकं भारतस्य परमाणुक्षेत्रे ऐतिहासिकं परिष्कारं निर्दिशति, येन सुरक्षायाः सार्वभौमत्वस्य, सार्वजनिक-हितस्य च असम्बद्धान् मानदण्डान् अवलम्ब्य शान्तिपूर्णं, स्वच्छं, सुस्थिरं च ऊर्जायाः क्षेत्राणि उद्घाट्यन्ते । सः एतदपि प्रख्यापितवान् यत् प्रधानमन्त्री-नरेन्द्र-मोदी-वर्यस्य तृतीयः कार्यकालः साहसिक-संरचनात्मक-परिष्कारैः स्पष्टतया लक्षितः, यत्र हि विज्ञानाय, नवान्वेषणाय, उद्यमशीलतायै च अविरतं महत्त्वं दीयते।

**क्रिकेट्**

महिलानां क्रिकेट्-क्रीडायां भारत-श्रीलङ्कादलयोः विंशतिं प्रतिविंशतिः स्पर्धामालिकायां चतुर्थी स्पर्धा अद्य भविष्यति। भारतीय-समयानुसारेण इयं स्पर्धा सायं सप्तवादने केरलसस्य तिरुवनन्त-पुरमस्थिते ग्रीनफील्ड क्रीडाङ्गणे भविष्यति। अस्याः शृङ्खलायाः तिस्रः एव स्पर्धाः भारतेन विजिताः। शृङ्खलायाः अन्तिमा स्पर्धा मङ्गलवासरे भविष्यति।